कारिका । रुक् कुष्ठम् ॥*॥ अथ सन्निपातस्य चिकित्सा ।

"शटीसुरतरूत्तमाः खदिरदारुरास्नाः समाः सनागरसुधान्विताः पिब शतावरीसंयुताः । मृदुज्वलनपाचिताः सह पुरेण सन्निपातज-व्यथापहतये हया शिशिरसेवनं मा कृथाः ॥"

उत्तमा त्रिफला । खदिरदारु विधारा इति लोके । सुधा गुड़ूची । पुरो गुग्गुलुः ।

"वचाकवचकच्छुरासहचरामृताभङ्गुरा-सुराह्वघननागरातरुणदारुरास्नापुराः । हयातरुणभीरुभिः सह भवन्ति सन्निपातज-व्यथोरुजड़िमक्लमभ्रमणपक्षघातद्रुहः ॥"

कवचः पर्प्पटकः । कच्छुरा यवासः । भङ्गुरा अतिविषा । सुराह्वं देवदारु । अतरुणदारु हृद्दारु । पुरो गुग्गुलुः । हया हयहन्ती एरण्डवत् पत्रविटपा तदलाभे दन्ती च ग्राह्या समानगुणत्वात् । तरुण एरण्डः । भीरुः शतावरी ।

"सुरदारु शटी सुधालता
सुवहा ग्रन्थियुता मृता जयी ।
सपुरा शमयन्ति सेविताः
सततं सन्निगतं सदागतिम् ॥"

सुवहा रास्ना ।

"मुस्तं रक्तप्राणदावाणदारु-
च्छिन्नारास्नाभीरुकर्च्चूरतिक्ताः ।
वासा विश्वा पञ्चमूलीयुगाढ्या
हन्यान्मन्यास्तम्भसन्निपातार्त्तीः ॥"

प्राणदा हरितकी । बाणः नीलपुष्पसहचरः । तिक्ता कटुका ॥*॥ अथान्तके विधिः ।

"दृष्टापहाय व्रतसुप्तवारि
ज्वरारिपूयादिगदापहारि ।
ज्वरच्छिदं जीवितदञ्च नित्यं
मृत्युञ्जयं चेतसि चिन्तयस्व ॥"

इह अन्तके व्रतं लङ्घनादिनियमम् ।

"कर्पूरप्रकरावदातवपुषं सद्योगमुद्राजुषं शश्वद्भक्तजनेषु भावुकजुषं भालस्फुरच्चक्षुषम् । संपूर्णामृतकुम्भसम्भृतकरं शुभ्राक्षमालाधरं पिङ्गोत्तुङ्गजटाकलापरुचिरं चन्द्रार्द्धमौलिं स्तुहि ॥
भिषग्भिरिति निर्णीतं सन्निपातेऽन्तकाभिधे । भेषजं जाह्नवीनीरं वैद्यो गोविन्द एव हि ॥"*

अथ वगदाहस्य चिकित्सा ।

"उशीरचन्दनोदीच्यद्राक्षामलकपर्प्पटैः । शृतं शीतं जलं दद्याद्दाहवड्ज्वरशान्तये ॥"
° इति षडङ्गपानम् ॥*॥

"उषितो निशि पर्य्युषितः प्रातर्धान्याक-तण्डुल क्वाथः । पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पत्तम् ॥"

धान्याकतण्डुलाः कण्डितधान्यकानि । इति धान्याकक्वाथः ॥*॥

"पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहाम् । कासासृक्पित्तवीसर्प श्वासान् हन्ति वमीमपि ॥"

तैलघृतक्षौद्रैरित्यत्र न समुच्चयः स्नेहेन केवलेन मधुनापि लिह्यात् । इति पथ्यावलेहः ॥*॥

"प्रशमयति दाहमचिरात् दधियुक्ककङ्गुन्-पत्रैर्लेपः । लेपो हिमकरमलयजनिम्बदलैस्तक्रपिष्टैर्व्वा ॥"

हिमकरः कर्पूरः । तथा च घनसारचन्द्रसंज्ञ इत्यमरः ॥

"उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥
शीताम्भसा तु शतशश्च विलोड़ितेन
गव्येन चन्दनयुतेन घृतेन दिग्धा ।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विशेत् सलिलकोष्ठमनल्पकालम् ॥
काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतकसंस्निग्धशीतलीकृतवाससा ॥"*॥

अथायमाह ।

"दाहावमर्द्दितं चामं निरन्नं तृष्णयान्वितम् । शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"

लाजतर्पणं लाजशक्तुभिस्तर्पणम् ।

"वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः । नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥
मुक्तावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः । हितञ्च भोजयेदन्नं येनाप्नोति सुखं महत् ॥"

प्रह्लादकं कामकृतं हर्षम् ॥*॥ अथ चित्तभ्रमस्य चिकित्सा ।

"कणोषणोपालवणोत्तमानि
करञ्जबीजं खलदामलानि ।
पथ्यावचासिद्धार्थकहिङ्गुशुण्ठी-
युतानि वस्ताम्बुविमिश्रितानि ॥
पिष्टा गुटीयं नयने विधेया
प्रचेतनेति प्रथिताभिधाना ।
चित्तभ्रमापस्मृतिभूतदोष-
शिरोऽतिरोगभ्रमनाशहेतुः ॥"

वस्ताम्बु छागमूत्रम् ।

"कुष्माण्डवतरोरम्भोगुड़विश्वाकणान्वितम् । निहितं नसि नूनं स्यात् चित्तभ्रमविनाशनम् ॥"

कुष्माण्डवतरोरम्भः अगस्तिपत्रस्वरसः ।

"मुरामूर्व्वजमेधाह्वामधूकमलयोद्भवैः । सकत्तृणमधुस्निग्धैः पुरपाणिजपांशुभिः ॥ लोहलामज्जकैलाभिर्धूपश्चित्तभ्रमापहः । ग्रहदोषहरः श्रीदः सौभाग्यकर उत्तमः ॥"

मुरा एकाङ्गी । मूर्व्वजो बाला । सकत्तृणः देवदारुः । पुरः गुग्गुलुः । पाणिजः नखः । पांशुः पर्पटकः । लोहं अगुरुः । लामज्जकं उशीरवत् पीतच्छविलुणविशेषः । तदलाभे उशीरं ग्राह्यम् ।

"मृद्वीकामरदारुमत्स्यशकलामुस्तामलक्योऽमृता पथ्यारैवतरामसेनकरजोराजीफलैः संयुताः । हन्युर्वित्तरजोऽथ दद्रु रदला द्राक्षा पटोली पयः पथ्या पर्पटराजहृच्चकटुकाशम्बूकपुष्प्यः शृताः ॥"

मृद्वीका द्राक्षा । मत्स्यशकला कटुका । आरेवतः आरग्वधः । रामसेनकः किराततिक्तकः । रजः पर्पटकः । राजीफलः पटोलः । अथ योगान्तरमाह । दद्रुलदला मण्डूकपर्णी । सा च ब्राह्मी ब्राह्मी मञ्जिष्ठा शोणकश्च । तथाप्यत्र ब्राह्मी ग्राह्या । यत उक्तं गुणग्रन्थे । ब्राह्मी मतिप्रदा मेध्या ज्वरहन्त्री रसायनीति ब्राह्मी वरम्भी इति लोके । पयः बालकं राजहृच्च आरग्वधः । शम्बूकपुष्पी शङ्खपुष्पी ॥ * ॥ अथ कर्णकस्य चिकित्सा ।

"प्रलेपः समस्तं नयत्यल्पमेकः
समुद्भिन्नशोथश्च रक्तावसेकः ।
विपक्वञ्च शस्त्रक्रिया पूयजित् सा
व्रणत्वं गतश्च द्रुतं तच्चिकित्सा ॥"

अथमर्थः । अल्पं तं कर्णकं एकः प्रलेपः अस्तं नाशं नयति । तच्चिकित्सा व्रणचिकित्सा ।

"निशाविशालामयमाणिमन्थ-
दार्व्वीङ्गुदीमूलकृतः प्रलेपः ।
प्रभाकरक्षीरयुतप्रभावाद्-
व्यस्तः समस्तोऽप्यथ कर्णकघ्नः ॥"

कुलत्थः कटफलं शुण्ठी कारवी च समांशकैः । सुखोष्णं लेपनं कार्य्यं कर्णमूले मुहुर्म्मुहुः ॥ गैरिकं कठिनीशुण्ठीकट्फलैः सवचैः समैः । उष्णैः काञ्जिकसंपिष्टैः प्रलेपः कर्णमूलनुत् ॥ शिग्रुराजिकयोः पिष्टा कर्णमूलं प्रलेपयेत् । कर्णमूलभवः शोथस्तेन लेपेन शाम्यति ॥ अभिशिरजलपरिमर्द्दितं मरिचकणाजीरसिन्धुजं त्वरितम् । नस्यविधिसेवितं ननु कर्णकरुक् नाशकृद्गदितम् ॥

भार्गीजयापौष्करकण्टकारी-
कट्विककोशातकुण्डलीभिः ।
कुलीरशृङ्गीकटुकारसाभिः
कृतः कषायः किल कर्णकघ्नः ॥"

भार्गी वभनेटी इति लोके । तदलाभे कण्टकारीमूलं ग्राह्यम् । जया गणियार इति लोके । पौष्करं पुष्करमूलम् । उषा वचा । कुण्डली गुड़ूची । कुलीरशृङ्गी कर्कटशृङ्गी । रसा रास्ना ।

"दशमूलमत्स्यशकलाचपला-
त्रिफलामहौषधिकिराततयुतम् ।
मरिचं परिक्वथितमाशु बला-
दपहन्ति कर्णरुजः सकलाः ॥"

चपला पिप्पली ॥ * ॥ अथ कण्ठकुब्जस्य चिकित्सा ।

"फलत्रिकत्र्यूषणमुस्तकहि-
कलिङ्गसिंहाननशर्व्वरीभिः ।